तिन्तिडीकाम्लवेतसम्। भव्यकर्कन्धुलकुचकरमर्दकरूषकम्।
बीजपूरककण्डूरे मालतीराजबन्धुकम्। कोलकद्वय-
पर्णानि द्वयोराम्लातयोरपि। पारावतं नागरकं प्राची-
नोलकमेव च। कपित्थामलकं चुक्रं फलं दन्तशठस्य च।
जाम्बवं नवनीतञ्च सौवीरकतुषोदके। सुरासवञ्च मद्यानि
मण्डतक्रदधीनि च। शुक्तानि चैव सर्व्वाणि ज्ञेयमाम्ल-
गणं द्विज!। एवमादीनि चान्यानि राजा सञ्चिनुयात्
पुरे। सैन्धवोद्भिदपाठेयपाक्यसामुद्रलोमकम्। कुप्य-
सौवर्चलविड़ं वालकेयं यवाह्वकम्। और्वं क्षारं काल-
भस्म विज्ञेयो लवणोगणः। एवमादीनि चान्यानि राजा
सञ्चिनुयात् पुरे। पिप्पली पिप्पलीमूलचव्यचित्रकनागरम्।
कुबेरकं मरीचकं शिग्रुभल्लातसर्षपाः। कुष्ठाजमोदा-
किणिही हिङ्गुमूलकधान्यकम्। कारवीकुञ्चिका याज्या
सुमुखा काकमाचिका। फणिज्झकोऽथ लशुनं भूस्तृणं
सुरसन्तथा। कायस्था च वयस्था च हरितालं मनः-
शिला। अमृता च रुदन्ती च रोहिषं कुङ्कुमं तथा।
जया एरण्डकाण्डीरं सल्लकी हञ्जिका तथा। सर्व्व-
पित्तानि मूत्राणि प्रायो हरितकानि च। फलानि चैव
हि तथा सूक्ष्मैला हिङ्गुपत्रिका। एवमादीनि चान्यानि
गणः कटुकसंज्ञितः। राजा सञ्चिनुयाद्दुर्गे प्रयत्नेन
नृपोत्तम! मुस्तं चन्दनह्रीवेरकृतमालकदारवः। हरि-
द्रानलदोशीरनक्तमालकदम्बकम्। दूर्व्वा पटोलकटुका
दीर्घत्वक् पत्रकं वचा। किराततिक्तभूतुम्बी विषा चाति-
विषा तथा। तालीशपत्रतगरसप्तपर्णविकङ्कताः। काको-
दुम्बरिका दिव्या तथा चैव सुरोद्भवा। षड्ग्रन्था रो-
हिणी मांसी पर्पटश्चाथ दन्तिका। रसाञ्जनं भृङ्गराजं
पतङ्गी परिपेलवम्। दुःस्पर्शा गुरुणी कामा श्यामाकं
गन्धनाकुली। रूपपर्णी व्याघ्रनखं मञ्जिष्ठा चतुरङ्गुला।
रम्भा चैवाङ्कुरास्फोता तालास्फोता हरेणुका। वेत्राग्र
वेतसस्तुम्बी विषाणी लोध्रपुष्पिणी। मालतीकरकृष्णाख्या
वृश्चिका जीविता तथा। पर्णिका च गुडूची च स गण-
स्तिक्तसंज्ञकः। एवमादीनि चान्यानि राजा सञ्चिनुयात्
पुरे। अभयामलके चोभे तथैव च विभीतकम्। प्रियङ्गु-
धातकीपुष्पं मोचाख्या चार्ज्जुनासनाः। अनन्ता स्त्री
तुवरिका श्योना च कट्फलं तथा। भूर्जपत्रं शिलापत्रं
पाटलापत्रलोमकम्। समङ्गा त्रिवृतामूलकार्पासगैरिका-
ञ्जनम्। विद्रुमं समधूच्छिष्टं कुम्भिका कुमुदोत्पलम्।
न्यग्रोधोदुम्बराश्वत्थकिंशुकाः शिंशपा शमी। प्रियाल-

पीलुकासारिशिरीषाः पद्मकं तथा। बिल्वोऽग्निमन्थः
प्लक्षश्च श्यामाकश्च वको घनम्। राजादनं करीरञ्च
धान्यकं प्रियकस्तथा। कङ्कोलाशोकवदराः कदम्बखदिर-
द्वयम्। एषां पत्राणि साराणि मूलानि कुसुमानि च।
एवमादीनि चान्यानि काषायाख्यो मतो रसः। प्रयत्नेन
नृपश्रेष्ठो राजा सञ्चिनुयात् पुरे। कीटाश्च मारणे
योग्या व्यङ्गतायां तथैव च। वातधूमाश्च मार्गाणां
दूषणानि तथैव च। धार्य्याणि पार्थिवैर्दुर्गे तानि
वक्ष्यामि पार्थिव! विषाणां धारणं कार्य्यं प्रयत्नेन
महीभुजा। विचित्राश्चागदा धार्य्या विषस्य शमनास्तथा।
रक्षोभूतपिशाचघ्नाः पापघ्नाः पुष्टिवर्द्धनाः। कालविदश्च
पुरुषाः पुरे धार्य्याः प्रयत्नतः। भीतान् प्रमत्तान् कुपि-
तांस्तथैव च विमानितान्। कुभृत्यान् पापशीलांश्च न
राजा वासयेत् पुरे। यन्त्रायुधाट्टालचयोपपन्नं समग्र-
धान्यौषधिसम्प्रयुक्तम्। वणिग्जनैश्च वृतमावसेत दुर्गं
सुगुप्तं नृपतिः सदैव। मनुरुवाच। रक्षोघ्नानि विष-
घ्नानि यानि धार्य्याणि भूभुजा। अगदानि समाचक्ष्व
तानि धर्म्मभृतां वर! मत्स्य उवाच। विल्वाटकी
यवक्षारं पाटला वाह्लिकोषणाः। श्रीपर्णी शल्लकी-
युक्तो निक्वाथः प्रोक्षणं परम्। सविषं प्रोक्षितं तेन
सद्यो भवति निर्व्विषम्। यवसैन्धवपानीयवस्त्रशय्यासनो-
दकम्। कवचाभरणं छत्रं वालव्यजनवेश्मनाम्। शेलुः
पाटलातिविषा शिग्रुमूर्व्वा पुनर्नवा। समङ्गावृषमूलञ्च
कपित्थवृषशोणितम्। महादन्तशठन्तद्वत् प्रोक्षणं विष-
नाशनम्। लाक्षाप्रियङ्गुमञ्जिष्ठा सममेला हरेणुका।
यष्ट्याह्वा मधुरा चैव बभ्रुपित्तेन कल्पिता। निखने-
द्गोविषाणस्थं सप्तरात्रं महीतले। ततः कृत्वा मणिं
हेम्ना बद्धं हस्तेन धारयेत्। संस्पृष्टं सविषं तेन सद्यो
भवति निर्व्विषम्। मनोह्वया शमीपत्रं तुम्बिका श्वेत-
सर्षपाः। कपित्थकुष्ठमञ्जिष्ठाः पित्तेन श्लक्ष्णकल्पिताः।
शुनो गोः कपिलायाश्च सौम्याक्षिप्तोऽपरोगदः। विष-
जित् परमं कार्य्यं मणिरत्नञ्च पूर्व्ववत्। मूषिका जतुका
चापि हस्ते बद्धा विषापहा। हरेणुर्मांसी मञ्जिष्ठा
रजनी मधुका मधु। अक्षत्वक् सुरसं लाक्षा श्वपित्तं
पूर्व्ववद्भुवि। वादित्राणि पताकाश्च पिष्टैरेतैः प्रलेपिताः।
श्रुत्वा दृष्ट्वा समाघ्राय सद्यो भवति निर्व्विषः। त्र्यूषणं
पञ्चलवणं मञ्जिष्ठा रजनीद्वयम्। सूक्ष्मैला त्रिवृतापत्रं
विड़ङ्गानीन्द्रवारुणी। मधुकं वेतसं क्षौद्रं विषाणे च